# अष्टमः पाठः
# भोरमदेवः

PV7S91

छत्तीसगढक्षेत्रस्य अनेकानि प्राचीनमन्दिराणि ऐतिहासिकस्थलानि अद्यापि छत्तीसगढस्य समृद्धिं गौरवशालीपरम्परां स्मारयन्ति। एवमेव एकं स्थानम् अस्ति, सः भोरमदेवः। कवर्धा जिलान्तर्गतं १६ (षोडश) कि.मी. दूरे सतपुड़ा–विन्ध्याचल–पर्वत–श्रेणीनां मध्ये प्रतिष्ठितः। अस्य मन्दिरस्य वैशिष्ट्येन अयं छत्तीसगढस्य खजुराहो इति अभिधीयते। भोरमदेवस्य मन्दिरं न केवलं छत्तीसगढप्रदेशस्य अपितु सम्पूर्णदेशे ऐतिहासिकपुरातात्त्विकधार्मिकदृष्टया महत्वपूर्णं स्थलम् अस्ति। वस्तुतः जनाः भोरमदेवं गोंडजातीनाम् आराध्यदेवः इति मन्यन्ते। अस्मात् कारणात् अस्य मन्दिरस्य नाम भोरमदेवः जातम्।



इतिहासकारसरअलेक्जेण्डरकनिंघमहोदयस्य अनुसारेण एतत् मन्दिरं विष्णुमन्दिरम् आसीत्। कालान्तरे गोंडशासकैः पूर्वस्थापितलक्ष्मीनारायणस्य प्रतिमाम् अपसार्य शिवलिङ्गं स्थापितम्। मंदिरे उत्कीर्णलेखैः वास्तुकलाभिश्च परिलक्ष्यते, यत् मन्दिरम् इदम् एकादशे ख्रीस्ताब्दे निर्मितम्।

नागरशैल्यां पूर्वाभिमुखमुख्यप्रवेशद्वारम् अस्ति। अस्मिन् मन्दिरे द्वारत्रयमस्ति। भोरमदेवस्य मन्दिरस्य निर्माणे खजुराहो उडीसायाः कोणार्कस्थित सूर्यमन्दिरस्य वास्तुशिल्पस्य अनुकृतिः परिलक्ष्यते। मन्दिरस्य गर्भगृहे गरुडस्थितभगवतः विष्णोः प्रतिमा, पञ्चमुखीनागः, नृत्यतः गणपतेः, अष्टभुजप्रतिमाश्च सन्ति। गर्भगृहे मुख्यतः शिवलिङ्गमेव मण्डितमस्ति।

मन्दिरं निकषा उमामहेश्वर–कालभैरव–द्विभुज–सूर्य प्रतिमाः शिव प्रतिमाश्च सन्ति। मन्दिरस्य उत्तरदिशि एकः विशालः सरोवरोऽपि अस्ति। भोरमदेवस्य समीपे अन्येषु दर्शनीयस्थलेषु चौरग्रामस्य निकटे आयताकारं पाषाणनिर्मितं ''मण्डलामहलम्'' अस्ति।

चौरग्रामस्य समीपे इष्टिकापाषाणेन निर्मितम् एकं मन्दिरं ''छेरकी महलम्'' इति नाम्ना ख्यातम्। अस्य मन्दिरस्य समीपे नैकापि अजास्ति तथापि मन्दिरस्य गर्भगृहे अजायाः शरीरेण निसृतं गन्धं जनाः अनुभवन्ति। एतदेव अस्य मन्दिरस्य वैशिष्ट्यम् अस्ति।

पावसवसन्तयोः काले हरीतिमाच्छादितपर्वतश्रृंखलानाम् अङ्के स्थितभोरमदेवस्य मन्दिरमस्ति। अस्य मोहकदृश्यानि वीक्ष्य जनाः आश्चर्यार्णवे निमज्जन्ति। प्रतिवर्षे चैत्रत्रयोदशम्यां तिथौ अत्र दिवसत्रयस्य पारम्परिकमेलापकः आयोज्यते। पर्यटनविकासस्य दृष्ट्या अयं मेलापकः शासनेन **"भोरमदेव महोत्सवः"** इति नाम्ना समायोज्यते। **"धन्यो भोरमदेवः शिवमस्तु"**

## शब्दार्थाः

स्मारयन्ति = याद दिलाते हैं। अद्यापि = आज भी। पर्वतश्रेणीनां मध्ये = पर्वत श्रेणियों के बीच। वैशिष्ट्येन = विशेषता से। अभिधीयते = कहते हैं। अपितु = बल्कि। दृष्ट्या = दृष्टि से। जातीनाम् = जातियों के। मन्यन्ते = मानते हैं। परिलक्ष्यते = दिखता है। नागरशैल्याम् = नागर शैली में। मण्डितम् = सुन्दर। निकषा = समीप में। उत्तरदिशि = उत्तर दिशा में। सरोवरोऽपि = सरोवर भी (तालाब भी)। दर्शनीयस्थलेषु = दर्शनीय स्थलों में। निर्मितम् = बनाया गया है। इष्टिका = ईंट। ख्यातम् = प्रसिद्ध। अजा = बकरी। निसृतगंधम् = निकलती गंध। अनुभवन्ति = अनुभव करते हैं। पावसबसन्तयोः = वर्षा और बसन्त के। हरीतिमाच्छादितम् = हरियाली से ढंकी हुई। पर्वतश्रृंखलानाम् = पर्वत श्रेणियों का। अंके = गोद में। आश्चर्याणवे = आश्चर्य के सागर में। निमज्जन्ति = डूबो देती है। समायोज्यते = समायोजित होता है।

## अभ्यास प्रश्नाः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए –**

(क) छत्तीसगढस्य खजुराहो किम् अस्ति ?
(ख) कस्य प्रतिमाम् अपसार्य शिवलिङ्गं प्रतिष्ठितम् ?
(ग) कस्यां शैल्यां पूर्वाभिमुखमुख्यप्रवेशद्वारम् अस्ति ?
(घ) "मण्डला महलम्" कुत्र निर्मितम् अस्ति ?
(ङ) इष्टिकापाषाणनिर्मितं मन्दिरं केन नाम्ना ख्यातम् ?
(च) भोरमदेवः मेलापकः कस्यां तिथौ आयोज्यते ?

**प्रश्न 2. युग्म कीजिए –**

PVGNAN

| | | | |
|---|---|---|---|
| (1) | भोरमदेवः | – | गन्धम् |
| (2) | नागरशैल्याम् | – | शिवलिङ्गम् |
| (3) | गर्भगृहे | – | मण्डलामहलम् |
| (4) | विशालसरोवरः | – | छत्तीसगढस्य खजुराहो |
| (5) | अजा | – | उत्तरदिशि |
| (6) | आयताकारं पाषाणनिर्मितम् | – | प्रवेशद्वारम् |

**प्रश्न 3. संस्कृत में अनुवाद कीजिए –**

(क) यहाँ अनेक मन्दिर हैं। (ख) भोरमदेव एक दर्शनीयस्थल है।
(ग) इस मंदिर में तीन द्वार हैं। (घ) गर्भगृह में शिवलिङ्ग है।
(ङ) चैत्रमास में मेला लगता है।

**प्रश्न 4.(क) अकारान्त "देव"शब्द की कारक रचना सभी विभक्तियों में लिखिए ?**
**(ख) स्मृ ( स्मर् ) शब्द की काल रचना लोट् एवं विधिलिङ् लकार में लिखिए?**

❖❖❖